आनन्दकानने"। तस्य चानन्दहेतुत्वं तत्र मरणेन तत्त्वज्ञानसम्पादनद्वारा ब्रह्मस्वरूपानन्दप्राप्तिहेतुत्वात् यथोक्तं जाबालोपनिषदि अविमुक्तं प्रकृत्य "तत्र हि जन्तोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे येनासावमृतीभूय मोक्षी भवति"।

**आनन्दज** त्रि० आनन्दात् जायते जन–ड ५त०। आनन्दजातेऽश्रुपातादौ सत्त्वगुणोद्रेके हि चेतसो द्रुतत्वात् नेत्रादिद्वारेण तत्प्रेरितस्य जलबिन्दोः क्षरणं भवति यथोक्तम्" सा०द०"अश्रुपातादयस्तद्वद्द्रुतत्वाच्चेतसो मताः" "आनन्दजाश्रुभिरनुस्रियमाणमार्गान्" नैष०।

**आनन्दथु** पु० आ+नदि–भावे अथुच्। आनन्दे सुखे नन्दथुरप्यत्र "यस्यासौ तस्य नन्दथुः" भट्टिः।

**आनन्ददत्त** पु० आनन्दो दत्तो येन। मेहने शब्दचि० मेहनाद्धि प्रचुरानन्दो भवतीति तस्य तथात्वम्।

**आनन्दन** न० आनन्दयत्यनेन आ+नदि–णिच् करणे ल्युट्। यातायातकाले मित्रादेः १आरोग्यस्वागतादिप्रश्ने २तात्कालिकालिङ्गने च। भावे ल्युट्। ३सुखजनने।

**आनन्दपट** पु०आनन्दजनकः पटः। नवोढावस्त्रे हारा०।

**आनन्दपूर्ण** पु० आनन्देन पूर्णः सम्पन्नः। सदाप्तकामत्वेन काम्यान्तराभावात् परिपूर्णे परमात्मनि। २अतिशयितानन्दयुक्ते त्रि०॥ आनन्दप्रचुरादयोऽप्युभयत्र। नैयायिकादिमते तु आनन्देन दुःखाभावेन पूर्णः अपरिच्छन्नतया विभुत्वात् इति इति भेदः।

**आनन्दप्रभव** पु० आनन्दःप्रभवः प्रभवापादनं यस्य। १वीर्ये रेतसि तस्य सात्त्विकानन्दोदयादेव प्रवृत्तेस्तथात्वम्। २भूतादिप्रपञ्चे "आनन्दाद्धेव प्रजाः प्रजायन्ते आनन्देन जीवन्ति आनन्दे प्रविलीयन्ते" इति श्रुत्या भूतानां ब्रह्मस्वरूपानन्दभवत्वात् तथात्वम्।

**आनन्दभुज्** पु० आनन्दं भुङ्क्ते भुज–क्विप्। सुषुप्त्यवस्थापन्ने प्राज्ञे जीवभेदे "आनन्दभुक् चेतोमुखः प्राज्ञः" इति श्रुतिः यथा लोके आयासशून्यः सुखी आनन्दभुगुच्यते तथा सुषुप्तोऽपि सर्वायासशून्यतया आनन्दभुगित्युच्यते।

**आनन्दभैरव** पु० कर्म्म०। शिवमूर्त्तिभेदे तस्य पत्नी ङीप्। प्रकृतिस्वरूपायां परदेवतायाम् तत्पत्न्यां स्त्री अनयोरेव रुद्रयामले प्रश्नप्रतिवचनकर्तृत्वम्।

**आनन्दमय** पु० आनन्दः प्रचुरोऽस्य प्राचुर्य्ये मयट्। प्रचुरानन्दस्वरूपे परमात्मनि 'आनन्दमयोऽभ्यासात्" शा०सू०। यथा च आनन्दप्रचुरत्वात् तस्य आनन्दमयत्वं तथा तद्भाष्ये निर्णीतम् यथा "तैत्तिरीयकेऽन्नमयं मनोमयं विज्ञानमयं चानुक्रम्याम्नायते "तस्माद्वा एतस्मा द्विज्ञानमयादन्योऽन्तर आत्मानन्दमय" इति तत्र संशयः किमिहानन्दमयशब्देन परएवात्मोच्यते यत्प्रकृतं 'सत्यं ज्ञानमनन्तं ब्रह्मेति" किं वान्नमयादिवत् ब्रह्मणोऽर्थान्तरमिति। किन्तावत्प्राप्तं ब्रह्मणोऽर्थान्तरममुख्य आत्मानन्दमयः स्यात्कस्मात्? अन्नमयाद्यमुख्यात्मप्रवाहपतितत्वात्। अथापि स्यात्सर्वान्तरत्वादानन्दमयो मुख्य एवात्मेति, न स्यात्प्रियाद्यवयवयोगाच्छारीरत्वश्रवणाच्च। मुख्यश्चेदात्मा स्यात् न प्रियादिसंस्पर्शः स्यात् इह तु "तस्य प्रियमेव शिर" इत्यादि श्रूयते। शारीरत्वञ्च श्रूयते। "तस्यैषएव शारीर आत्मा यः पूर्वस्येति"। तस्य पूर्वस्य विज्ञानमयस्यैषएव शारीर आत्मा यएष आनन्दमय इत्यर्थः। न च सशरीरस्य सतः प्रियाप्रियसंस्पर्शो वारयितुं शक्यः। तस्मात् संसार्य्येवानन्दमय आत्मेत्येवं प्राप्ते इदमुच्यते। परएव आनन्दमयो भवितुमर्हति कुतः? अभ्यासात्परस्मिन्नेव ह्यात्मन्यानन्दशब्दो बहुकृत्वोऽभ्यस्यते आनन्दमयं प्रस्तुत्य "रसो वै स" इति तस्यैव रसत्वमुक्त्वोच्यते "रसं ह्येवायं लब्ध्वानन्दी भवति कोह्येवान्यात् कः प्राण्याद्यदेष आकाश आनन्दो न स्यादेष ह्येवानन्दयति सैषानन्दस्य मीमांसा भवति"। "एष आनन्दमयमात्मानमुपसंक्रामति" "आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन" "आनन्दो ब्रह्मेति व्यजानादिति" च। श्रुत्यन्तरे च "विज्ञानमानन्दं ब्रह्मेति" ब्रह्मण्येवानन्दशब्दो दृष्टः। एवमानन्दशब्दस्य बहुकृत्वो ब्रह्मण्यभ्यासादानन्दमय आत्मा ब्रह्मेति गम्यते। यत्तूक्तम् अन्नमयाद्यमुख्यात्मप्रवाहपतितत्वादानन्दमयस्याप्यमुख्यात्मत्वमिति। नासौ दोषः आनन्दमयस्य सर्वान्तरत्वात्। मुख्यमेव ह्यात्मानमुपदिदिक्षु शास्त्रं लोकबुद्धिमनुसरदन्नमयं शरीरमनात्मानमत्यन्तमूढानामात्मत्वेन प्रसिद्धमनूद्य मूषानिषिक्तद्रुतताम्रादिप्रतिमावत् ततोऽन्तरमन्तरमित्येवं पूर्वेण पूर्वेण समानमुत्तरमुत्तरमनात्मानमात्मेति ग्राहयत् प्रतिपत्तिसौकर्य्यापेक्षया सर्वान्तरं मुख्यमानन्दमयमात्मानमुपदिदेशेति श्लिष्टतरम्। यथाऽरुन्धतीनिदर्शने बह्वीष्वपि तारास्वमुख्यास्वरुन्धतीषु दर्शितासु याऽन्त्या प्रदर्श्यते सा मुख्यैवारुन्धती भवति एवमिहाप्यानन्दमयस्य सर्वान्तरत्वान्मुख्यमात्मत्वम्। यत्तु ब्रूषे प्रियादीनां शिरस्त्वादिकल्पनानुपपन्ना मुख्यस्यात्मन इति अतीतानन्तरोपाधिजनिता सा न स्वाभाविकीत्य-